# अखिलभारतीय-पतञ्जलिसमारोहः

भारतवर्षमिदं कर्मभूमिर्देवभूमिः पुण्यभूमिरिति विविधसंज्ञाभिर्विभूष्यते श्रीमद्भिः शेमुषीकैः। भूम्यामस्यामनेके ऋषिकल्पा आचार्याः देवांशभूता आविर्भूय विश्वस्योपकारं विहितवन्तः। शेषावतारत्वेन प्रज्ञैरभिमतो मुनि भगवत्पतञ्जलिर्देव- वाण्याः, भारतजनानाम्, भारतसमाजस्य च महान्तमुपकारं कृतवन्तः।

महामुनिः पतञ्जलिः शेषावतार इति समेऽपि प्राचीना विद्वान्सो वदन्ति। कश्चन योगसूत्रव्याख्याकारः प्राचीन आचार्यः

**यस्त्यक्त्वा रूपमाद्यं प्रभवति जगतोऽनेकधानुग्रहाय।**
**प्रक्षीणक्लेशराशिर्विषमविषधरोऽनेकवक्त्रस्सुभोगी॥**

इति कथनेनैनं शेषावतारं मन्यते। भगवान्पतञ्जलिः चरकेति नाम्ना चरकशास्त्रं रचितवान्। सोऽपि शेषावतार इति भावप्रकाशकारो वदति –

**स भाति चरकाचार्यो देवाचार्यो यथा दिवि।**
**सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः॥**

पाणिनिकृतव्याकरणशास्त्रस्य मूलभूताऽष्टाध्यायीग्रन्थे सवार्तिके महाभाष्यग्रन्थस्त्वेतस्य वैदुष्यस्य चमत्कार एव विद्यते। यत्र न केवलं व्याकरणस्याऽपितु दर्शनस्य , समाजस्य , राष्ट्रस्य , विज्ञानस्य , धर्मशास्त्रस्य च समेऽपि विषयाः प्रसन्नगम्भीरशैल्या प्रतिपादिताः। आचार्यभर्तृहरिरपि व्याकरणमहाभाष्ययोगसूत्रचरकसंहितादिकर्तृत्वेन भगवन्तं पतञ्जलिं संकेतयति –

**कायवाग्बुद्धिविषया ये मला हि समवस्थिताः।**
**चिकित्सा लक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः॥ 1,148**

यद्यपि चरकसंहिताग्रन्थः आचार्येण आत्रेयेण विरचित इत्युल्लेखो लभ्यते। तथापि अत्रिगोत्रीयश्चरकाऽपरनाम्ना प्रसिद्धः पतञ्जलिरेव तत्र ज्ञायते, इति विद्वत्परम्परायां प्रसिद्धम् । चरकग्रन्थटीकाकारश्चक्रपाणिरप्येवमेव स्वग्रन्थमंगलाचरणे लिखति –

**पातञ्जलमहाभाष्यचरकप्रतिसंस्कृतैः।**
**मनो वाक्कायदोषाणां हन्त्रेऽहिपतये नमः॥**

महाराजः समुद्रगुप्तः स्वरचितकृष्णचरितप्रस्तावनायां महाभाष्ययोगसूत्रचरकशास्त्रकर्तृत्वेन पतञ्जलिं स्मरति –

**विद्ययोद्रिक्तगुणतया भूमावरतां गतः।**
**पतञ्जलिर्मुनिवरो नमस्यो विदुषां सदा॥**
**कृतं येन व्याकरणभाष्यं वचनशोधनम्।**
**धर्माावियुक्ताश्चरके योगा रोगमुषः कृताः॥**
**महानन्दमयं काव्यं योगदर्शनमद्भुतम्।**
**योगव्याख्यानभूतं तद् रचितं चित्तदोषहम्॥**

समेष्वपि शास्त्रेषु प्रमाणभूताचार्यत्वेन प्रतिष्ठितो भगवान् पतञ्जलिः काश्यां जाह्नवीतटस्थे नागकूपाख्ये स्थलविशेषे प्रतिवर्षं स्मर्यते। यत्र नागपञ्चम्यां व्याकरणविषयानादाय शास्त्रचर्चा विधीयते। काशीहिन्दूविश्वविद्यालय इयं काशी नगरी च सर्वविद्या- राजधानीत्वेन प्रथिता । संस्कृतविद्याधर्मविज्ञानसंकायस्थव्याकरण-विभागो भगवतोऽनन्तस्य दिवसे श्रावणशुक्लपञ्चम्यां नागपञ्चमी -त्यख्यायाम् **अखिलभारतीय-पतञ्जलिसमारोहं** समायोजयितुं वाञ्छति। भगवता पतञ्जलिना विरचितानां महाभाष्य-योगसूत्र-चरकशास्त्राणां विषयेषु विद्व च्चर्चाभिः श्रद्धाञ्जलयो भगवते पतञ्जलये समर्पितास्स्युरित्यस्माकमभिलाषा।

व्याकरणविभागः सर्वान्नपि समुत्सुकान् विदुषो निवेदयति यदस्मिन् समारोहे वाक्पुष्पोपहारैः भगवन्तं महामुनिं पतञ्जलिं समर्चयन्त्विति।

यह भारतवर्ष पुण्यभूमि, कर्मभूमि, देवभूमि इत्यादि संज्ञाओं से विद्वज्जनों द्वारा विभूषित है। इसी पुण्यतम भूमि में अनेक ऋषिकल्प विद्वान् एवं देवांशभूत आचार्य अवतार धारण कर विश्व का कल्याण किये है। इन्ही देवांशभूत आचार्यों में भगवान् पतंजलि का स्थान सर्वोपरि रहा है। जिन्होंने देववाणी के द्वारा भारतीय जनमानस एवं समाज का कल्याण किया।

महामुनि पतंजलि शेषावतार हैं, यह भारतवर्ष के सभी मनीषी मानते है। भगवान पतंजलि ने ही चरकशास्त्र की भी रचना की। तथा पाणिनि कृत व्याकरण शास्त्र के मूलभूत अष्टाध्यायी ग्रन्थ एवं कात्यायन के वार्तिकों के ऊपर महाभाष्य ग्रन्थ की वैदुष्यपूर्ण रचना की। जिसमें न केवल व्याकरण अपितु दर्शन, समाज, राष्ट्र, विज्ञान, और धर्मशास्त्र इत्यादि विषयों पर गम्भीर चिन्तन किया गया है। यद्यपि चरक संहिता ग्रन्थ आचार्य आत्रेय के द्वारा विरचित है। इस प्रकार का उल्लेख शास्त्रों में वर्णित है तथापि अत्रि गोत्रोत्पन्न आत्रेय महर्षि पतंजलि का ही दूसरा नाम है ऐसा विद्वत् परम्परा में प्रसिद्ध है। जिसका उल्लेख भर्तृहरि ने वाक्यपदीय १.४८ में किया है।

सभी शास्त्रों में पारंगत प्रमाणभूत प्रतिष्ठित भगवान पतंजलि काशी में गंगा नदी के तट पर स्थित नागकूप स्थल पर प्रति वर्ष पूजे जाते हैं। जहॉ नागपंचमी तिथि में व्याकरण विषयक चर्चा (शास्त्रार्थ) होती है। काशी नगरी एवं काशी हिन्दू विश्वविद्यालय विश्व में सर्वविद्या की राजधानी के रुप में प्रसिद्ध है। विगतवर्ष के समान इस वर्ष भी संस्कृत विद्या धर्म विज्ञान संकायस्थ व्याकरण विभाग भगवान पतंजलि दिवस श्रावण शुक्ल पंचमी (नागपंचमी ) में **अखिलभारतीयपतंजलिसमारोह** का आयोजन करना चाहते है। हम लोगो की अभिलाषा है कि भगवान पतंजलि के द्वारा विरचित महाभाष्य , योगसूत्र, चरकसंहिता इत्यादि शास्त्रों पर विद्वत् चर्चा के द्वारा महामुनि पतंजलि को श्रद्धांजलि समर्पित की जाय।

अतएव व्याकरण विभाग समस्त विद्वानों से निवेदन करता है कि इस समारोह में अपनी उपस्थिति सुनिश्चित कर अपने वाक्पुष्पोपहार के द्वारा महामुनि पतंजलि जी की समर्चना करें।

इस वर्ष यह समारोह **त्रिदिवसीय** होगा। प्रथम दिवस में महाभाष्य (१-२ आह्निक), योग शास्त्र (सभाष्य प्रथम पाद), चरक संहिता१-२ अध्याय की कण्ठस्थ शलाका परीक्षा होगी। द्वितीय तथा तृतीय दिवसों मे महाभाष्य योगशास्त्र तथा चरकसंहिता पर चर्चा होगी। प्रतियोगिता में स्नातक एवं स्नातकोत्तर छात्र प्रतिभागी होंगे। प्रत्येक में तीन पुरस्कार होंगे। जिसका विवरण निम्न है।

**प्रथम-२०००, द्वितीय-१५००, तृतीय-१०००**

पंजीयनपत्रम्

## अखिलभारतीय-पतञ्जलिसमारोहः

**समारोहतिथिः – 27- 29 जुलाई 2017**

**(चतुर्थी, नागपञ्चमी ,षष्ठी)**

काशीहिन्दूविश्वविद्यालयः, वाराणसी

व्याकरणविभागः

संस्कृतविद्याधर्मविज्ञानसंकायः

नाम ..........................-.......................................

पदं कार्यञ्च .......................................................

संस्थानाम ..........................................................

विशेषज्ञता............................................................

पत्राचारसंकेतः.......................................................

दूरभाषसंख्या.........................................................

अणुसंकेतः (Email)................................................

**पंजीयनशुल्कम्**

अध्यापकः ------ 700/

शोधच्छात्रः ------ 500/

प्रतियोगीछात्रः ------ 050 /

दिनांकः -----    हस्ताक्षरम्

**संरक्षकः**

**प्रो. गिरीशचन्द्र त्रिपाठी**

माननीयकुलपतिः,

काशीहिन्दूविश्वविद्यालयः

**मार्गदर्शकः**

प्रो०चन्द्रमापाण्डेयः,

संकायप्रमुखः, संस्कृतविद्याधर्मविज्ञानसंकायः

काशीहिन्दूविश्वविद्यालयः

## पतंजलिसमारोहसमितिः

**समिति-अध्यक्षः**

प्रो०बालशास्त्री

वरिष्ठाचार्यो व्याकरणविभागः

६४१५४४६६६८

**संयोजकः**

प्रो०भगवत्शरणशुक्लः

अध्यक्षो व्याकरणविभागः

६४५२३००६०२

**सहसंयोजकः**

डॉ०रमाकान्तपाण्डेयः

वरिष्ठसहायकाचार्यो व्याकरणविभागः

६४५४७४६०२६

# काशीहिन्दूविश्वविद्यालयः

# वाराणसी

**अखिलभारतीय-पतञ्जलिसमारोहः**



**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥**

**व्याकरणविभागः**

**संस्कृतविद्याधर्मविज्ञानसंकायः**

**समारोहतिथिः – 27- 29 जुलाई 2017** Email –

**vyakaranvibhagbhu@gmail.com**